"ममापि किं नो दयसे दयाधन
त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः।
निमज्जयन् सन्तमसे पराशयं
विधिस्तु वाच्यः क्व तवागसः कथा॥"
इति नैषधे ८ सर्गः॥

सन्तर्पणं, क्ली, (सन्तर्पयति इन्द्रियाणीति। सं+तृप्+णिच्+ल्युः।) द्राक्षादाडिमखर्ज्जूरीकदलीशर्कराक्षाजाचूर्णमध्वाज्य-संमिलितम्। इति राजनिर्घण्टः॥ तृप्तिकारके, त्रि। यथा,
"पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः।
जज्वाल लोकस्थितये स राजा
यथाध्वरे वह्निरभिप्रणीतः॥"
इति भट्टिकाव्ये १ सर्गः॥

सन्तानः,पुं,(सन्तनोति विस्तारयति पत्रपुष्पादीनिति। सम्+तन विस्तारे+"तनोतेरुपसंख्यानम्।" ३।१।१४०। इत्यस्य वार्त्तिकोक्त्या णः।) कल्पवृक्षः। (संतन्यते इति। तन+घञ्।) वंशः। इत्यमरः॥ विस्तारः। (यथा, महाभारते। १।१०३।१०।
"तयोरुत्पादयापत्यं सन्तानाय कुलस्य नः।
मन्नियोगात् महाबाहो धर्म्मं कर्त्तुमिहार्हसि॥")
अपत्यम्। इति मेदिनी॥ (यथा, मनुः।९।५९।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यक् नियुक्तया प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये॥")
तद्वैदिकपर्य्यायः। तुक् १ तोकम् २ तनयः ३ तोक्म ४ तक्म ५ शेषः ६ अप्नः ७ गयः ८ जाः ९ अपत्यम् १० यहुः ११ सूनुः १२ नपात् १३ प्रजा १४ बीजम् १५। इति पञ्चदशापत्यनामानि। इति वेदनिघण्टौ। २।२॥ (अस्त्रविशेषे, क्ली। यथा, महाभारते।५।९६।४०।
"सन्तानं नर्त्तकं घोरमास्यमोदकमष्टमम्।
एतैर्विद्धाः सर्व्व एव मरणं यान्ति मानवाः॥")

सन्तानिका, स्त्री, (सन्तानो विस्तारोऽस्त्यस्या इति। सन्तान+ठन्।) क्षीरसरः। मर्कटजालकः। क्षुरिकाफलम्। फेनः। इति हारावली॥ अथास्या गुणाः।
"सन्तानिका गुरुः शीता वृष्या पित्तास्रवातजित्"
इति राजनिर्घण्टः॥
मिष्टान्नविशेषः। सरभाजा इति भाषा। तत्करणप्रकारो यथा। दुग्धं शरावचतुष्टयं शर्करार्द्धशरावपरिमिताद्दत्तं शरावपादैकञ्च गव्हीत्वा तद्दुग्धे आवर्त्तनेन घनीभूते उत्क्षेप्स्यति मन्थानदण्डेन मथनेन बहुतरफेनो भविष्यति। ततृफेन सहितदुग्धस्य तप्ताङ्गारपरिवर्जनात् सरो जायते। तं सरमस्त्रेण चतुष्कोणाकृतिं निर्म्माय घृतेन भृष्ट्वा एकतारवद्गशर्करारसेमग्नं कुर्य्यात् किन्तु तन्नाधिकपचनं न रचेत्। इति पाकराजेश्वरः॥ (जालकरज्जुः। यथा, सुश्रुते।१।१८।
"अत ऊर्द्ध्वं व्रणबन्धनद्रव्याण्युपदेक्ष्यामः। तद्यथा क्षौमकार्प्पास-* * विदलरज्जुतूलफल-सन्तानिकालौहानीति॥")

सन्तापः, पुं, (सं+तप+घञ्।) अग्निजतापः। तत्पर्य्यायः। संज्वरः २। इत्यमरः॥ तापः३ प्लोषः ४ उष्मा ५। इति राजनिर्घण्टः॥ सम्यक् तापनञ्च॥ (यथा, कथासरित्सागरे। १५। ७५।
"जन्मना ज्वरसन्तापपीडा गाढ़मवाप सः॥")
दुःखम्। यथा, भागवते। ६। १४। ४१।
"दासीनां कोऽनुसन्तापः स्वामिनः परिचर्य्यया।
अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः॥")

सन्तापनः, पुं, (सन्तापयतीति। सं+तप+णिच्+ल्युः।) कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः॥ सम्यक्तापकारके,त्रि॥ (यथा, भागवते। ७।१०।२६।
"दिष्ट्या ते निहतः पापो लोकसन्तापनोऽसुरः॥")

सन्तापितः, त्रि, (सं+तप+णिच्+क्तः। अध्वादिना श्रान्तः। इत्यमर-भरतौ॥ अस्य पर्य्यायः सन्तप्तशब्दे द्रष्टव्यः॥

सन्तिः,स्त्री, (सनु दाने+क्तिच्। "सनः क्तिचि लोपश्चास्यान्यतरस्याम्।" ६। ४। ४५। इति नलोपाभावः।) दानम्। अवसानम्। इत्यमरे सातिशब्दटीकायां नीलकण्ठः॥ सतिश्च सातिश्च सतिसाती। सनोतेराशिषि तिगन्तस्य एतौ निपात्यौ। पक्षे सनुतात् इति वाक्ये तितुत्रेति इवसतेरिति इमनिषेधे वनतनेत्यत्र तितिवर्ज्जनात् नलोपाभावे सन्तिः। इति मुग्धबोधटीकायां दुर्गादासः॥ सन्तिशब्दो निर्विसर्गश्चेत् अस भू भावे इत्यस्मात् अन्तिप्रत्ययेन निष्पन्नः। यथा,—
"सन्ति रम्या जनपदा बह्वन्नाः परितः कुरून्।"
इति महाभारते विराटपर्व्व॥

सन्तुष्टः, त्रि, (सं+तुष+क्तः।) सन्तोषयुक्तः। यथा,—
"गच्छध्वममराः सर्व्वे गृहीत्वार्च्चां स्वमालयम्
सन्तुष्टा वरमस्माकं दत्त्वेदानीं सुपूजिताः॥"
इति छन्दोगवृषोत्सर्गतत्त्वम्॥

सन्तोषः, पुं, (सं+तुष+घञ्।) सन्तुष्टिः। तत्पर्य्यायः। धृतिः २ स्वास्थ्यम् ३। इति हेमचन्द्रः॥ (यथा, हितोपदेशे।
"सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्॥")

सन्दंशः,पुं,(सन्दशतीति। सं+दन्श+अच्।) कङ्कमुखः। इति हेमचन्द्रः॥ साँड़ासी इति भाषा॥ (यथा, मार्कण्डेये। २४। ६३।
"निपातितानां भूपृष्ठे उद्धृत्याचि निरीक्षताम्
सन्दंशैः पश्य कृष्यन्ते नरैर्यास्येर्मुखात्ततः॥"
वैद्यशास्त्रोक्तयन्त्रविशेषः। यथा, सुश्रुते।१।७।
"तत्र मनःशरीराबाधकराणि शल्यानि तेषामाहरणोपायो यन्त्राणि। तानि षट्प्रकाराणि। तद्यथा। स्वस्तिकयन्त्राणि। सन्दंशयन्त्राणि।
*** द्वे सन्दंशयन्त्रे *** सनिग्रहोऽनिग्रश्च
सन्दंशौ षोड़शाङ्गुलौ भवतस्त्वङ्मांससिरास्नायुगतशल्योद्धरणार्थमुपदिश्येते॥")

सन्दंशिका, स्त्री, (सन्दंशतीति। सं+दंश+ण्वुल्। टापि अत इत्वम्।) सुचुटी। साँड़ाशी इति चिमटा इति च भाषा। लौहयन्त्रविशेषः॥ कातारि इति भाषा। इति मेदिनी॥

सन्दर्भः, पुं, (सं+दृभ ग्रन्थने+घञ्।) रचना। इति हलायुधः॥ (यथा, आर्य्यासप्तशत्याम्। ७००।
"कविसमरसिंहनादः स्वरानुवादः सुधैकसंवादः।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः॥")
प्रबन्धः। इति त्रिकाण्डशेषः॥ ग्रन्थनम्। यथा,—
"सन्दर्भो रचना गुम्फः श्रन्थनं ग्रन्थनं समाः।"
इति हेमचन्द्रः॥
तस्य लक्षणं यथा,—
"गूढ़ार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता तथा।
नानार्थवत्त्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः॥"
इति रूपसनातनगोस्वामिकृतश्रीभागवतीयषट्सन्दर्भस्य प्रथमसन्दर्भकारिका॥

सन्दर्शनं, क्ली, (सं+दृश+ल्युट्।) सम्यक्प्रकारेण दर्शनम्। यथा,—
"सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
(सं+दृश+णिच्+ल्युट्। कारितदर्शनम्। यथा, महाभारते। १। २। १८०।
"अस्त्रसन्दर्शदारभ्यो धर्म्मराजस्य सन्निधौ॥")

सन्दानं, क्ली, (सं+दा+ल्युट्।) दाम। इत्यमरः॥ सम्यग्दानञ्च॥

सन्दानः, पुं, गजस्याष्ठीवतोरधोभागः। इति त्रिकाण्डशेषः॥

सन्दानिका, स्त्री, अरिखदिरः। इति राजनिर्घण्टः॥

सन्दानितः,त्रि,(सन्दानं जातमस्येति। सन्दान+इतच्।) बद्धः। इत्यमरः॥

सन्दानिनी, स्त्री, गोगृहम्। इति हेमचन्द्रः॥ गोयालि इति भाषा॥

सन्दावः, पुं, (सं+दु+"समि युद्रुदुवः।" ३। ३। २३। इति घञ्।) पलायनम्। इत्यमरः॥

सन्दाहः, पुं, (सं+दह+घञ्।) मुखताल्वोष्ठदाहः। इति राजनिर्घण्टः॥

सन्दिग्धः, त्रि, (सं+दिह+क्तः।) सन्देहयुक्तः। यथा,—
"न तावत् सन्दिग्धसाध्यधर्म्मत्वं पक्षत्वमिति पक्षतामूलम्॥"

सन्दिग्धमतिः, त्रि, सन्देहविषयीभूतबुद्धियुक्तः। सन्दिग्धा मतिर्यस्य इति बहुव्रीहिसमासनिष्पन्नः॥

सन्दिग्धार्थः,पुं, (सन्दिग्धोऽर्थः।) सन्देहविषयीभूतार्थः। (सन्दिग्धोऽर्थो यस्य।) तद्विशिष्टे त्रि॥